आर्यौ वैकर्णवर्षदेवौ उच्यताम् । अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हतीति । किमाहतुर्भवन्तौ । महान्खल्वयमर्थः । मन्त्रयित्वा वक्तव्यमिति । सदृशमेतत् । तदागम्यतां मन्त्रशालामेव प्रविशामः । आचार्य अभिवादये । प्रविशतु भवान्मन्त्रशालाम् । पितामह अभिवादये । प्रविशतु भवान्मन्त्रशालाम् । मातुल अभिवादये । प्रविशतु भवान्मन्त्रशालाम् । आर्यौ वैकर्णवर्षदेवौ प्रविशतां भवन्तौ । भो भोः सर्वक्षत्रियाः स्वैरं प्रविशन्तु भवन्तः । वयस्य कर्ण प्रविशावस्तावत् । प्रविश्य । आचार्य एतत्कूर्मासनम् । आस्यताम् । पितामह एतत्सिंहासनम् । आस्यताम् । मातुल एतच्चर्मासनम् । आस्यताम् । आर्यौ वैकर्णवर्षदेवौ आसातां भवन्तौ । भो भोः सर्वक्षत्रियाः स्वैरमासतां भवन्तः । किमिति किमिति । महाराजो नास्त इति । अहो सेवाधर्मः । नन्वयमहमासे । वयस्य कर्ण त्वमप्यास्स्व । उपविश्य । आर्यौ वैकर्णवर्षदेवौ उच्यताम् । अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हतीति । किमाहतुर्भवन्तौ । अत्रभवान्गान्धारराजो वक्ष्यतीति । भवतु मातुलेनाभिधीयताम् । किमाह मातुलः । अत्रभवति गाङ्गेये स्थिते कोऽन्यः सेनापतिर्भवितुमर्हतीति । सम्यगाह मातुलः । भवतु भवतु पितामह एव भवतु । वयमप्येतदभिलषामः ।